# ॐ श्री परमात्मने नमः। अथ नवमोऽध्यायः। राजविद्याराजगुह्ययोगः।

श्रीभगवानुवाच।

इदं तु ते गुह्यतमम् प्रवक्ष्याम्यनसूयवे।
ज्ञानं विज्ञानसहितम् यज्ज्ञात्वा मोक्ष्यसेऽशुभात्॥१॥
राजविद्या राजगुह्यम् पवित्रमिदमुत्तमम्।
प्रत्यक्षावगमं धर्म्यम् सुसुखं कर्तुमव्ययम्॥२॥
अश्रद्दधानाः पुरुषाः धर्मस्यास्य परन्तप।
अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि॥३॥
मया ततमिदं सर्वम् जगदव्यक्तमूर्तिना।
मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः॥४॥
न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम्।
भूतभृन्न च भूतस्थः ममात्मा भूतभावनः॥५॥
यथाकाशस्थितो नित्यम् वायुः सर्वत्रगो महान्।
तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय॥६॥
सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम्।
कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम्॥७॥
प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः।
भूतग्राममिमं कृत्स्नम् अवशं प्रकृतेर्वशात्॥८॥
न च मां तानि कर्माणि निबध्नन्ति धनञ्जय।
उदासीनवदासीनम् असक्तं तेषु कर्मसु॥९॥
मयाध्यक्षेण प्रकृतिः सूयते सचराचरम्।
हेतुनानेन कौन्तेय जगद्विपरिवर्तते॥१०॥
अवजानन्ति मां मूढाः मानुषीं तनुमाश्रितम्।
परं भावमजानन्तः मम भूतमहेश्वरम्॥११॥
मोघाशा मोघकर्माणः मोघज्ञाना विचेतसः।
राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः॥१२॥
महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः।
भजन्त्यनन्यमनसः ज्ञात्वा भूतादिमव्ययम्॥१३॥
सततं कीर्तयन्तो माम् यतन्तश्च दृढव्रताः।
नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते॥१४॥
ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते।
एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम्॥१५॥
अहं क्रतुरहं यज्ञः स्वधाहमहमौषधम्।
मन्त्रोऽहमहमेवाज्यम् अहमग्निरहं हुतम्॥१६॥
पिताहमस्य जगतः माता धाता पितामहः।
वेद्यं पवित्रमोंकारः ऋक्साम यजुरेव च॥१७॥
गतिर्भर्ता प्रभुः साक्षी निवासः शरणं सुहृत्।
प्रभवः प्रलयः स्थानम् निधानं बीजमव्ययम्॥१८॥
तपाम्यहमहं वर्षम् निगृह्णाम्युत्सृजामि च।
अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन॥१९॥
त्रैविद्या मां सोमपाः पूतपापाः यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते।
ते पुण्यमासाद्य सुरेन्द्रलोकम् अश्नन्ति दिव्यान् दिवि देवभोगान्॥२०॥
ते तं भुक्त्वा स्वर्गलोकं विशालम् क्षीणे पुण्ये मर्त्यलोकं विशन्ति।
एवं त्रयीधर्ममनुप्रपन्नाः गतागतं कामकामा लभन्ते॥२१॥
अनन्याश्चिन्तयन्तो माम् ये जनाः पर्युपासते।
तेषां नित्याभियुक्तानाम् योगक्षेमं वहाम्यहम्॥२२॥
येऽप्यन्यदेवताभक्ताः यजन्ते श्रद्धयान्विताः।
तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम्॥२३॥
अहं हि सर्वयज्ञानाम् भोक्ता च प्रभुरेव च।
न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते॥२४॥
यान्ति देवव्रता देवान् पितॄन्यान्ति पितृव्रताः।
भूतानि यान्ति भूतेज्याः यान्ति मद्याजिनोऽपि माम्॥२५॥
पत्रं पुष्पं फलं तोयम् यो मे भक्त्या प्रयच्छति।
तदहं भक्त्युपहृतम् अश्नामि प्रयतात्मनः॥२६॥
यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्॥२७॥
शुभाशुभफलैरेवम् मोक्ष्यसे कर्मबन्धनैः।
संन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि॥२८॥
समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः।
ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम्॥२९॥
अपि चेत्सुदुराचारः भजते मामनन्यभाक्।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः॥३०॥
क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति।
कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति॥३१॥
मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः।
स्त्रियो वैश्यास्तथा शूद्राः तेऽपि यान्ति परां गतिम्॥३२॥
किं पुनर्ब्राह्मणाः पुण्याः भक्ता राजर्षयस्तथा।
अनित्यमसुखं लोकम् इमं प्राप्य भजस्व माम्॥३३॥
मन्मना भव मद्भक्तः मद्याजी मां नमस्कुरु।
मामेवैष्यसि युक्त्वैवम् आत्मानं मत्परायणः॥३४॥

ॐ तत्सदिति श्रीमद् भगवद् गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे राजविद्याराजगुह्ययोगो नाम नवमोऽध्यायः॥

This text is an attempt to imitate the audio rendering of *The Srimad Bhagavad Gita*, Chapter 9, by *Swami Brahmananda*.

om śrī paramātmane namaḥ.  atha navamo'dhyāyaḥ.   rājavidyārājaguhyayogaḥ.

śrībhagavānuvāca
idaṁ tu te guhyatamam
pravakṣyāmyanasūyave
jñānaṁ vijñānasahitam
yajjñātvā mokṣyase'śubhāt   1
rājavidyā rājaguhyam
pavitramidamuttamam
pratyakṣāvagamaṁ dharmyam
susukhaṁ kartumavyayam   2
aśraddadhānāḥ puruṣāḥ
dharmasyāsya parantapa
aprāpya māṁ nivartante
mṛtyusaṁsāravartmani   3
mayā tatamidaṁ sarvam
jagadavyaktamūrtinā
matsthāni sarvabhūtāni
na cāhaṁ teṣvavasthitaḥ   4
na ca matsthāni bhūtāni
paśya me yogamaiśvaram
bhūtabhṛnna ca bhūtasthaḥ
mamātmā bhūtabhāvanaḥ   5
yathākāśasthito nityam
vāyuḥ sarvatrago mahān
tathā sarvāṇi bhūtāni
matsthānītyupadhāraya   6
sarvabhūtāni kaunteya
prakṛtiṁ yānti māmikām
kalpakṣaye punastāni
kalpādau visṛjāmyaham   7
prakṛtiṁ svāmavaṣṭabhya
visṛjāmi punaḥ punaḥ
bhūtagrāmamimaṁ kṛtsnam
avaśaṁ prakṛtervaśāt   8
na ca māṁ tāni karmāṇi
nibadhnanti dhanañjaya
udāsīnavadāsīnam
asaktaṁ teṣu karmasu   9
mayādhyakṣeṇa prakṛtiḥ
sūyate sacarācaram
hetunānena kaunteya
jagadviparivartate   10
avajānanti māṁ mūḍhāḥ
mānuṣīṁ tanumāśritam
paraṁ bhāvamajānantaḥ
mama bhūtamaheśvaram   11
moghāśā moghakarmāṇaḥ
moghajñānā vicetasaḥ
rākṣasīmāsurīṁ caiva
prakṛtiṁ mohinīṁ śritāḥ   12
mahātmānastu māṁ pārtha
daivīṁ prakṛtimāśritāḥ
bhajantyananyamanasaḥ
jñātvā bhūtādimavyayam   13
satataṁ kīrtayanto mām
yatantaśca dṛḍhavratāḥ
namasyantaśca māṁ bhaktyā
nityayuktā upāsate   14
jñānayajñena cāpyanye
yajanto māmupāsate
ekatvena pṛthaktvena
bahudhā viśvatomukham   15
ahaṁ kraturahaṁ yajñaḥ
svadhāhamahamauṣadham
mantro'hamahamevājyam
ahamagniraham hutam   16
pitāhamasya jagataḥ
mātā dhātā pitāmahaḥ
vedyaṁ pavitramoṁkāraḥ
ṛksāma yajureva ca   17
gatirbhartā prabhuḥ sākṣī
nivāsaḥ śaraṇaṁ suhṛt
prabhavaḥ pralayaḥ sthānam
nidhānaṁ bījamavyayam   18
tapāmyahamahaṁ varṣam
nigṛhṇāmyutsṛjāmi ca
amṛtaṁ caiva mṛtyuśca
sadasaccāhamarjuna   19
traividyā māṁ somapāḥ
pūtapāpāḥ
yajñairiṣṭvā svargatiṁ
prārthayante
te puṇyamāsādya
surendralokam
aśnanti divyān divi
devabhogān   20
te taṁ bhuktvā svargalokaṁ
viśālam
kṣīṇe puṇye martyalokaṁ
viśanti
evaṁ trayīdharma-
manuprapannāḥ
gatāgataṁ kāmakāmā
labhante   21
ananyāścintayanto mām
ye janāḥ paryupāsate
teṣāṁ nityābhiyuktānām
yogakṣemaṁ vahāmyaham   22
ye'pyanyadevatābhaktāḥ
yajante śraddhayānvitāḥ
te'pi māmeva kaunteya
yajantyavidhipūrvakam   23
ahaṁ hi sarvayajñānām
bhoktā ca prabhureva ca
na tu māmabhijānanti
tattvenātaścyavanti te   24
yānti devavratā devān
pitṝnyānti pitṛvratāḥ
bhūtāni yānti bhūtejyāḥ
yānti madyājino'pi mām   25
patraṁ puṣpaṁ phalaṁ toyam
yo me bhaktyā prayacchati
tadahaṁ bhaktyupahṛtam
aśnāmi prayatātmanaḥ   26
yatkaroṣi yadaśnāsi
yajjuhoṣi dadāsi yat
yattapasyasi kaunteya
tatkuruṣva madarpaṇam   27
śubhāśubhaphalairevam
mokṣyase karmabandhanaiḥ
saṁnyāsayogayuktātmā
vimukto māmupaiṣyasi   28
samo'haṁ sarvabhūteṣu
na me dveṣyo'sti na priyaḥ
ye bhajanti tu māṁ bhaktyā
mayi te teṣu cāpyaham   29
api cetsudurācāraḥ
bhajate māmananyabhāk
sādhureva sa mantavyaḥ
samyagvyavasito hi saḥ   30
kṣipraṁ bhavati dharmātmā
śaśvacchāntiṁ nigacchati
kaunteya pratijānīhi
na me bhaktaḥ praṇaśyati   31
māṁ hi pārtha vyapāśritya
ye'pi syuḥ pāpayonayaḥ
striyo vaiśyāstathā śūdrāḥ
te'pi yānti parāṅgatim   32
kiṁ punarbrāhmaṇāḥ puṇyāḥ
bhaktā rājarṣayastathā
anityamasukhaṁ lokam
imaṁ prāpya bhajasva mām   33
manmanā bhava madbhaktaḥ
madyājī māṁ namaskuru
māmevaiṣyasi yuktvaivam
ātmānaṁ matparāyaṇaḥ   34

om tatsaditi śrīmad bhagavad gītāsu upaniṣatsu brahmavidyāyāṁ yogaśāstre śrīkṛṣṇārjunasaṁvāde
rājavidyārājaguhyayogo nāma navamo'dhyāyaḥ